'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 3rd Semester Examination, 2022

## CC6-SANSKRIT (306)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

विभाग-क

1. संस्कृतभाषया देवनागरीलिप्या च एकस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) वासवदत्तापद्मावत्योः च चरित्रयोः सादृश्यं वैसादृश्यञ्च आलोच्यताम्।

(ख) स्वप्नवासवदत्तम् इति नाटके वर्णितस्य स्वप्नदृश्यस्य नाटकीयतात्पर्यमालोचयत।

2. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 6×1 = 6

(क) कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते॥

(ख) सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः॥

3. बङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः) 3×2 = 6

(क) सुखमर्थो भवेद्दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥

(ख) गुणानां वा विशालानां सत्काराणां च नित्यशः।
कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः॥

(ग) मधुमदकला मधुकरा मदनार्ताभिः प्रियाभिरुपगूढाः।
पादन्यासविषण्णा वयमिव कान्तावियुक्ताः स्युः॥

4. संस्कृतभाषया देवनागरीलिप्या च प्रश्नद्वयं समाधेयम् – 3×2 = 6

(क) रुमण्वान् कः ? 'स्वप्नवासवदत्तम्' – इति नाटके तस्य का भूमिका ?

(ख) ब्रह्मचारी किमर्थं लावाणकग्रामं गतवान् ? ततः किमर्थं परावर्तितवान् ?

(ग) 'दुःखं न्यासस्य रक्षणम्' – इत्युक्तेः वक्ता कः ? इह न्यासशब्दाभिधेयः कः ?

विभाग-ख

5. अधोलिखितेषु कस्यापि <u>एकस्य</u> उत्तरं देयम् – 12×1 = 12

(क) हंसपदिकायाः संगीतस्य नाटकीय-तात्पर्यम् आलोचयत।

(ख) 'उपमा कालिदासस्य' – व्याख्या कार्या।

6. संस्कृतभाषया देवनागरीलिप्या च <u>एकस्य</u> व्याख्या कार्या – 6×1 = 6

(क) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामम्
प्रत्यर्पितन्यास इवान्तरात्मा॥

(ख) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

7. संस्कृतभाषया देवनागरीलिप्या च <u>प्रश्नद्वयं</u> समाधेयम् – 3×2 = 6

(क) शकुन्तलायाः पितरौ कौ ? केन सा पालिता ?

(ख) 'अभिज्ञानशकुन्तलम्' नाटके मङ्गलाचरणे ईशस्य कति रूपाणि सन्ति ? नामानि लिखत।

(ग) 'गण्डस्योपरि पिण्डकः संवृत्तः' – इत्युक्तेः वक्ता कः ? कथमेवं तस्य चिन्तनम् ? 'चक्रवर्ती' इत्यस्य कोऽर्थः ?

8. श्लोकपादपूरणं कुरुत (<u>एकस्य</u> देवनागरीलिप्या) – 6×1 = 6

(क) ...........................................
...........................................।
...........................................
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥

(ख) सरसिजमनुविद्धं-शैवलेनापि रम्यं
...........................................।
...........................................
...........................................॥

——×——